| SRI BHAGAWAN MAHAVEER JAIN COLLEGE<br>Vishweshwarapuram, Bangalore.<br><br>**MOCK EXAM-I Feb 2016** | **Course:** | II PUC |
|---|---|---|
| | **Subject:** | Sanskrit |
| | **Max. Marks:** | 100 |
| | **Duration:** | 3:15 hrs. |

**। एकवाक्येन उत्तरं लिखत । 10 x 1 = 10**

1.मर्त्यानां कर्मभूमिः का?

2.विक्रमादित्यकथां का कथयति?

3.माकन्दिका नाम नगरी कुत्र अस्ति?

4. पौरवः कः?

5.महाश्वेतायाः पिता कः?

6."सा" शान्तिः कुत्र कार्यं करोति?

7. कर्णस्य गुरुः कः?

8. कामधेनुगुणा का?

9. कृष्णशास्त्रीणां माता का?

10.राणाप्रतापस्य अश्वस्य नाम किम्?

**॥ द्वित्रैः वाक्यैः कन्नडभाषया वा आङ्लभाषया वा उत्तरं लिखत । (पञ्चानामेव) 5 x 2 = 10**

11. पञ्चद्वीपानां नामानि लिखत ।

12. राणाप्रतापस्य प्रतिज्ञा का?

13. कीदृशं कुसुमगन्धम् अजिघ्रम् इति महाश्वेता वदति?

14. सुन्दरः किमर्थं स्वग्रामं त्यक्तवान्?

15. वज्राख्यः कीटः किं करोति?

16. नरविग्रहाः देवाः के ?

17. बाल्ये शास्त्रीणां संस्कृताध्ययनम्?

**III पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नड–आङ्लभाषया वा कुरुत । (त्रयणामेव) 3 x 3 = 9**

18. अतः परीक्ष्य कर्तव्यं विशेषात्सङ्गतं रहः। अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥

19. गतेऽथ तस्मिन् सम्प्राप्तकन्यारत्ने नृपात्मजे।आययुस्तस्य चिन्वन्तः शिष्याः प्रव्राजकस्य ते॥

20. भवज्जीवितमात्मनःप्रियं तथा परेषामपि जीवितं प्रियम्। निरीक्ष्यते जीवितात्मनो यथा तथा परेषामपि रक्ष जीवितम्॥

21. ज्ञेयं तद्भारतं वर्षं सर्वकर्मफलप्रदम्। अत्रकर्माणि कुर्वन्ति त्रिविधानि तु नारद ॥

22. भानुः सकृद्युक्ततुरङ्ग एव रात्रिं दिवं गन्धवहः प्रयाति। शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ॥

**IV). पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत (चतुर्णामेव) । 4 x 2 = 8**

23. अद्यप्रभृति मनुष्यभक्षणं परित्यज।

24. भवतु,अनिर्वर्णनीयं परकलत्रम् ।

25. मम हस्ते प्रभूतं धनं विद्यते ।

26. धैर्यधना हि साधवः।

27. दृढीक्रियतां चेतः|

28. सः यत्रकुत्रापि भवतु कालेज् आनेतव्य एव।

**V). दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्लभाषया वा उत्तरं लिखत (पञ्चानामेव) ।** **5 x 5 =25**

२९. विक्रमादित्यस्य प्रभावेण राक्षसः कथं परिवर्तितः?

३०. प्रव्राजकः।

३१. तपोधनं युवानं दृष्ट्वा महाश्वेता किम् अचिन्तयत्।

32. रोटिकाप्रसङ्गः|

३३. पुण्डरीक-महाश्वेतयोः सरससंवादः।

३४. शान्तिदर्शनात् तरुणस्य चिन्तासन्ततिः

३५. कर्णशापप्रसङ्गः।

**VI). मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।** **4 x 1 = 4**

३६. ___________गन्धम् अभ्यजिघ्रम्

३७. अहमस्मि____________सुन्दरस्य पत्नि ।

३८. ममापराधः _______क्षन्तव्यः

३९ सिंहवच्च_____________।

| परा‌क्रमेत्, कृपया, कुसुम, शान्तिः |
|---|

**VII संयोजयत ।** **4 x 1 = 4**

| | | |
|---|---|---|
| ४० | जाह्नवी | कण्वशिष्यः |
| ४१ | शार्ङ्गरवः | कुङ्कुमम् |
| ४२ | विलासमिव | गङ्गा |
| ४३ | ललाटे | सरस्वत्याः |

**VIII रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरूत (त्रयणामेव)** **3 x 1 = 3**

४४. भगवतः सुन्दरं रूपमासीत्।

४५. उदयसिंहः प्रतापी राजा आसीत्।

४६. प्रमदा परिणेतुः समीपे इष्यते।

४७. परिव्राट् मौनं त्यक्त्वा उक्तवान्।

४८. पुत्थलिका भोजराजं प्रति अब्रवीत्।

**IX यथानिर्देशं कुरुत (चतुर्णामेव)** **4 x 3 = 12**

४९. **सन्धिं विभजत (त्रयाणामेव)**

मुनिस्स्सः,हरिरत्र,खल्वन्यत्र,एकैकं,आदायैताम्,प्रागेव।

५० **समस्तपदं लिखत (त्रयाणामेव)**

पश्यत एनम्, तत् विरुद्धम्,धौतः च, ग्रामस्य एव, सिंहवत् च।

५१ **लिङ्ग–विभक्ति–वचनानि लिखत––––(द्वयोरेव)**

वाचा, परीक्षाम्, मया, अम्बया।

५२ **लकार पुरुष––––––(द्वयोरेव)**

अपश्यम्, बभूव, खिद्यसे, ददर्श।

५३. **वाक्यदोषं परिहरत**

पितुः सह पुत्रः गच्छति ।**अथवा** यथा गुरुः रोचते।

५४ **प्रयोगं परिवर्तयत**

अनुष्ठितः गुरोः सन्देशः।

अथवा

दुष्यन्तः शकुन्तलां अपश्यत्।

५५ **अलङ्कारं सलक्षणं निर्दिशत**

कुसुमगन्धेन मधुकरीव आकृष्यमाणा।

अथवा

अस्याः आननारविन्दे अपूर्वाकर्षणम् आसीत्

**५६. कन्नडभाषया वा आङ्लभाषया अनुवदतः ।** **5**

सङ्गणकस्य निर्देशनं प्रदातुं का भाषा नितराम् उपयुक्ता इति अन्वेष्टुं बहवः प्रयोगाः कृताः। विश्वस्य सकलाः भाषाः तत् प्रयोगे परीक्षिताः । विश्वभाषासु संस्कृतमेव अधिकं वैज्ञानिकं वर्तते। अतः सङ्गणकस्य कृते संस्कृतम् एव श्रेष्ठभाषा भवितुं अर्हतीति अद्य् प्रयोगैः प्रमाणितम्।

**५७. संस्कृतभाषया अनुवदत–**

**5**

The mind of a child is like a wet clay mound. The potter gives it a correct shape by his skill.In tha same way a teacher construct the future of a student. And fills his mind with the feeling that-" I am great. At times necessary I will collect and utilize all my energy for the nation.

ಮಗುವಿನ ಮನವು ಹಸಿಯ ಮಣ್ಣಿನ ಮುದ್ದೆ ಇದ್ದಂತೆ. ಕುಂಬಾರನು ತನ್ನ ಕೈಚಳಕದಿಂದ ಅದಕ್ಕೆ ಒಂದು ರೂಪವನ್ನು ಕೊಡುವನು. ಅಂತೆಯೇ ಒಬ್ಬ ಗುರುವು ತನ್ನ ಶಿಷ್ಯನ ಭವಿಷ್ಯ ಜೀವನವನ್ನು ನಿರ್ಮಿಸುವನು. ಶಿಷ್ಯನ ಮನದಲ್ಲಿ–'ನಾನು ಉತ್ತಮನು. ಸಮಯ ಬಂದಾಗ ನನ್ನೆಲ್ಲ ಶಕ್ತಿಯನ್ನೂ ಒಗ್ಗೂಡಿಸಿ ದೇಶಕ್ಕಾಗಿ ವಿನಿಯೋಗಿಸುವೆನು' ಎಂದು ಭಾವನೆಯನ್ನು ತುಂಬುತ್ತಾನೆ.

**५८. परिच्छेदं पठित्वा प्रश्नानां उत्तराणि लिखत ।** **5 x 1 = 5**

अतिरूपात् सीता अपहृता अभूत् । अतिलौल्यात् रावणः हतः अभूत्। अतिदानात् बलिः बद्धः अभूत्। अतः नीतिः का इति चेत् अति सर्वत्र वर्जयेत् इति। सर्वेषु विषयेषु व्यवहारेषु च "अति" इति मास्तु "मितिः" अस्तु इति अस्य वाक्यस्य आशयः । अतिभुक्तिः अत्युक्तिः च सद्यः प्राणापहारिणी इति एकं सुभाषितम् अपि विद्यते । अस्माकं जीवनेऽपि सर्वत्र मध्यमो मार्गः आश्रयणीयः । अतिनियमः यथा समीचीनो न तथैव नियमातीतता अपि । मनुष्यसम्बन्धेषु अपि अतितीक्ष्णता परिहरणीयैव । अत्यनुशासनम् अत्युपदेशः अत्यालस्यम् इति अति न क्वापि अस्तु । सर्वत्र तस्य वर्जनं भवतु । अयं मार्गः सन्तोषस्य शान्तेः तुष्टेः पुष्टेरपि।

**प्रश्नाः**

१.अस्य गद्यस्य आशयः किम्?

२. अस्माकं जीवने का मार्गः आश्रयणीयः ?

३.प्राणापहारिणी के?

४.अत्रत्य सुभाषितम् किम्?

५.तीक्ष्णता परिहरणीयैव कुत्र?

******